## पथिमथोः सर्वनामस्थाने । (१९९/३६८७)

पथिमथिशब्दावौणादिकाविनिप्रत्ययान्तौ प्रत्ययस्वरेणान्तोदात्तौ, तयोः सर्वनामस्थाने [1]परतः आदिरुदात्तो भवति । पन्थाः, पन्थानौ, पन्थानः[2] । मन्थाः, मन्थानौ, मन्थानः । सर्वनामस्थाने इति किम् ? पथः पश्य । मथः पश्य । उदात्तनिवृत्तिस्वरेणान्तोदात्तो भवति । प्रत्ययलक्षणमत्रापि नेष्यते । पथिप्रियः इत्यत्र पूर्वपदप्रकृतिस्वरेणान्तोदात्तः पथिशब्दः ॥

## अन्तश्च तवै युगपत् । (२००/३६८८)

तवैप्रत्ययान्तस्यान्तः, चशब्दादादिश्च युगपदुदात्तौ भवतः । कर्तवै । हर्तवै । प्रत्ययाद्युदात्तत्वापवादः । युगपद्ग्रहणं पर्यायनिवृत्त्यर्थम् । एकवर्जम् इति वचनाद् यौगपद्यं न स्यात् ॥

## क्षयो निवासे । (२०१/३६८९)

क्षयशब्दो निवासेऽभिधेये आद्युदात्तो भवति । [3]क्षियन्ति निवसन्ति अस्मिन् इति क्षयः । 'पुंसि सञ्ज्ञायां घः प्रायेण' (३.३.११८/३२९६) इति [4]घप्रत्ययान्तस्य प्रत्ययस्वरः प्राप्तः । [5]क्षये (ऋ. १०.११८.१) जागृहि प्रपश्यन् । निवासे इति किम् ? क्षयो वर्तते दस्यूनाम् । 'एरच्' (३.३.५६/३२३१) इत्ययमजन्तः ॥

## जयः करणम् । (२०२/३६९०)

जयशब्दः करणवाची आद्युदात्तो भवति । जयन्ति [6]तेन इति जयः । 'पुंसि सञ्ज्ञायां घः प्रायेण' (३.३.११८/३२९६) इति घः, तस्य प्रत्ययस्वरः प्राप्तः । जयोऽश्वः । करणम् इति किम् ? जयो [7]वर्तते ब्राह्मणानाम् । अत्रापि 'एरच्' (३.३.५६/३२३१) [8]इत्ययमजन्तः ॥

## वृषादीनां च । (२०३/३६९१)

वृषः इत्येवमादीनामादिरुदात्तो भवति । वृषः । जनः । ज्वरः । ग्रहः । हयः । गयः । एते सर्वे [9]पचाद्यच्प्रत्ययान्ताः । गयः इत्यत्र गायतेर्निपातनाद् एत्वम् । नयः । तयः । अयः । वेदः । [10]अंशः । अशः । दवः । एतेऽपि तथैवाच्प्रत्ययान्ताः । सूदः । इगुपधात् (३.१.१३५/२८९७) इति कप्रत्ययान्तः । गुहा । भिदादिरङ्प्रत्ययान्तः (३.३.१०४/३२८१) । 'शमरणौ सञ्ज्ञायां सम्मतौ भावकर्मणोः' (ग.सू.१७०) । शमो भावे । रणः कर्मणि । अजन्तावेतौ निपातनाद् भावकर्मणोः भवतः । मन्त्रः पचाद्यजन्तः । शान्तिः इति क्तिजन्तः । कामः । यामः । घञन्तावेतौ । आरा । धारा । कारा । भिदादयः । वहः । गोचरादिषु घप्रत्ययान्तः । कल्पः । अजन्तः । पादः । घञन्तः । तत्र क्वचित् प्रत्ययस्वरः प्राप्तः, क्वचित् 'कर्षात्वतो घञोऽन्त उदात्तः' (६.१.१५९/३६८०) इति । [11]वृषादिराकृतिगणः । अविहितमाद्युदात्तत्वं वृषादिषु द्रष्टव्यम् ॥

---

1. परतः नास्ति फ. 2. पन्थानम् इत्यधिकम् फ. 3. क्षयन्ते ह. 4. घप्रत्ययोऽयं तस्य क, घप्रत्ययान्तस्य नास्ति फ. 5. ते इत्यधिकम् ह. 6. अनेन क. फ. ह. 7. वर्तते नास्ति फ. 8. इति नास्ति फ. 9. पचादि नास्ति फ. 10. अंशः नास्ति ग. 11. वृष जन ज्वर गृह हय श्रम वेद सूद अंश गुहा इति वृषादिः ड.